.. શ્રી દક્ષિણામૂર્તિ નવરત્નમાલિકા સ્તોત્રમ્ ..
મૂલેવટસ્ય મુનિપુઙ્ગવસેવ્યમાનં
    મુદ્રાવિશેષમુકુલીકૃતપાણિપદ્મમ્ .
મન્દસ્મિતં મધુરવેષમુદારમાદ્યં
    તેજસ્તદસ્તુ હૃદિ મે તરુણેન્દુચૂડમ્ .. ૧..
શાન્તં શારદચન્દ્રકાન્તિધવળં ચન્દ્રાભિરમાનનં
    ચન્દ્રાર્કોપમકાન્તિકુણ્ડલધરં ચન્દ્રાવદાતાંશુકમ્ .
વીણાપુસ્તકમક્ષસૂત્રવલયં વ્યાખ્યાનમુદ્રાંકરૈ-
    ર્બિભ્રાણં કલયે હૃદા મમ સદા
શાસ્તારમિષ્ટાર્થદમ્ .. ૨..
કર્પૂરપાત્રમરવિન્દદળાયતાક્ષં
    કર્પૂરશીતલહૃદં કરુણાવિલાસમ્ .
ચન્દ્રાર્ધશેખરમનન્તગુણાભિરામ-
    મિન્દ્રાદિસેવ્યપદપઙ્કજમીશમીડે .. ૩..
દ્યુદ્રોધઃ સ્વર્ણમયાસનસ્થં
    મુદ્રોલ્લસદ્બાહુમુદારકાયમ્ .
સદ્રોહિણીનાથકળાવતંસં
    ભદ્રોદધિં કચન ચિન્તયામઃ .. ૪..
ઉદ્યદ્ભાસ્કરસન્નિભં ત્રિણયનં શ્વેતાઙ્ગરાગપ્રભં
    બાલં મૌઞ્જિધરં પ્રસન્નવદનં ન્યગ્રોધમૂલેસ્થિતમ્ .
પિઙ્ગાક્ષં મૃગશાવકસ્થિતિકરં સુબ્રહ્મસૂત્રાકૃતિમ્
    ભક્તાનામભયપ્રદં ભયહરં શ્રીદક્ષિણામૂર્તિકમ્ ..
૫..
શ્રીકાન્તદ્રુહિણોપમન્યુ તપન સ્કન્દેન્દ્રનન્દ્યાદયઃ
    પ્રાચીનાગુરવોઽપિયસ્ય કરુણાલેશાદ્ગતાગૌરવમ્ .

તં સર્વાદિગુરું મનોજ્ઞવપુષં મન્દસ્મિતાલઙ્કૃતં
    ચિન્મુદ્રાકૃતિમુગ્ધપાણિનળિનં ચિત્તં શિવં કુર્મહે .. ૬..
કપર્દિનં ચન્દ્રકળાવતંસં
    ત્રિણેત્રમિન્દુપતિમાનનોજ્વલમ્ .
ચતુર્ભુજં જ્ઞાનદમક્ષસૂત્ર-
    પુસ્તાગ્નિહસ્તં હૃદિ ભાવયેચ્છિવમ્ .. ૭..
વામોરૂપરિસંસ્થિતાં ગિરિસુતામન્યોન્યમાલિંગિતાં
    શ્યામામુત્પલધારિણી શશિનિભાંચાલોકયન્તં શિવમ્ .
આશ્લિષ્ટેન કરેણ પુસ્તકમધો કુંભં સુધાપૂરિતં
    મુદ્રાં જ્ઞાનમયીં દધાનમપરૈર્મુક્તાક્ષમાલાં ભજે
.. ૮..
વટતરુનિકટનિવાસં પટુતરવિજ્ઞાનમુદ્રિતકરાબ્જમ્ .
કચનદેશિકમાદ્યં કૈવલ્યાનન્દકન્દળં વન્દે .. ૯..
ઇતિ શ્રી દક્ષિણામૂર્તિ નવરત્નમાલા સ્તોત્રં સંપૂર્ણમ્ ..